# श्रीमद् भागवत रसिक कुटुंब

## अष्टसख्याष्टकम्

**गोरोचनारुचिमनोहरकांतिदेहां,**

**मायूरपुच्छतुलितच्छविचारुचेलाम्।**

**राधे तव प्रतिसखीं(ञ्) च गुरुं सखीनां(न्),**

**ताम्बूलभक्तिललितां(लँ्) ललितां(न्) नमामि॥1॥**

**सौदामिनीनिचयचारुरुचिप्रतीकां(न्),**

**तारावलीललितकांतिमनोज्ञचेलाम्।**

**श्रीराधिके तव चरित्रगुणानुरूपां,**

**सद्गंधचंदनरतां(वँ्) विषये विशाखाम्॥2॥**

**काश्मीरकांतिकमनीयकले वराभां,**

**सुस्निग्धकाचनिचयप्रभचारुचेलाम्।**

**श्रीराधिके तव मनोरथवस्त्रदाने ,**

**चित्रां(वँ्) विचित्रहृदयां सदयां प्रपद्ये॥3॥**

नृत्योत्सवां हि हरितालसमुज्ज्वलाभां,
सद्दाडिमीकुसुमकांतिमनोज्ञचेलाम्।
वंदे मुदा रुचिविनिर्जितचंद्ररेखां,
श्री राधिके तव सखीमहमिंदुलेखाम्॥4॥

सद्रत्नचामरकरां(वँ) वरचंपकाभां(ञ्),
चाषाख्यपक्षिरुचिरच्छविचारुचेलाम्।
सर्वान् गुणांस्तुलयितुं(न्) दधतीं(वँ) विशाखां,
राधेऽथ चंपकलतां भवतीं प्रपद्ये॥5॥

सद्पद्मकेशरमनोहरकांतिदेहां,
प्रोद्यज्जवाकुसुमदीधितिचारुचेलाम्।
प्रायेण चंपकलताधिगुणां सुशीलां,
राधे भजे प्रियसखीं(न्) तव रंगदेवीम्॥6॥

सच्चंद्रचंदनमनोहरकुंकुमाभां,
पांडुच्छविप्रचुरकांतिलसद्दुकूलाम्।
सर्वत्र कोविदतया महितां समज्ञां,
राधे भजे प्रियसखीं(न्) तव तुंगविद्याम्॥7॥

**प्रोत्तप्तशुद्धकनकच्छविचारुदेहां,**

**प्रोद्यत्प्रवालनिचयप्रभचारुचेलाम्।**

**सर्वानुजीवनगुणोज्ज्वलभक्तिदक्षां,**

**श्रीराधिके तव सखीं(ङ्) कलये सुदेवीम्॥8॥**

